प्रथममुपस्थापकाभावात् प्रकृतिदृष्टक्रमेणालम्भनम्। तदुक्तम् “आश्विनग्रहणेनासौ पर्य्युपास्थाप्यते यतः। इतरस्त्वितः स्थानान्नोपस्थाप्येत केनचित्। तयोस्तु प्रकृतौ दृष्टः क्रमो ग्राह्यो मनीषिभिः”। यत्तु स्थानक्रमो यथा एकोद्दिष्टे पार्व्वणधर्म्मातिदेशात् कुशास्तरणदानाद्यनुष्ठानं तत्र पार्व्वणे यस्मिन् स्थाने यत् क्रियते तस्य एकोद्दिष्टेऽपि तथैवेत्युदीच्यैर्नोक्तं तच्च शास्त्रदीपिकादिमीमांसानिबन्धानादृत्य स्वकपोलरचितत्वात् स्थानपदार्थमुख्यार्थत्यागात् मुख्यार्थत्वे स्थानस्यैव लाभेन क्रमालाभात् “प्रकृतिवद्विकृतिरिति” न्यायेनैव तल्लाभात् स्थानक्रमानुपयोगाच्चेत्यलमाग्रहेण। मुख्यक्रमादयं बलवान्।

५ मुख्याद्यथा। चित्रयागे सप्तहविषां मध्ये चतुर्थपञ्चमावित्थमाम्नायेते “सारस्वतौ भवतः” इति एतद्वै दैव्यं मिथुनमिति” वाक्यशेषात् स्त्रीपुंदैवत्यं यागद्वयं विहितं तत्र सरस्वती च सरस्वांश्चेति समासे “पुमान् स्त्रिया” इति सूत्रेणैकशेषात् देवतार्थेन प्रत्ययाल्लभ्यते तयोश्च यागयोर्निर्व्वापादयो धर्म्मा विधिप्राप्ताः तत्र स्त्रीयागस्य पुंयागस्य वा प्रथमं निर्वापः कार्य्य इति संशयः। अत्र श्रुत्यर्थपठनस्थानप्रवृत्तीनां अन्यतमस्यापि प्रक्रमाभावादनियमात् स्वेच्छया कर्त्तव्य इति प्राप्ते आह “मुख्यक्रमेण वाङ्गानां तदर्थत्वात्” सू०। मुख्यस्य प्रधानस्य क्रमेणाङ्गानां क्रमो ग्राह्यः तदर्थत्वात् अङ्गानां प्रधानार्थत्वात् प्रधानोद्देश्यकप्रवृत्तिसाध्यत्वादिति यावत् हौत्रकाण्डे याज्यानुवाक्ये “प्रणोदेवी सरस्वतीति” पूर्वमाम्नातं “पीपिवांसं सरस्वतः” इति पश्चादाम्नातमिति याज्यानुवाक्यापाठक्रमात् स्त्रीदेवताकस्य होमस्य प्रथममनुष्ठानं पश्चाच्च पुंदेवताकस्यानुष्ठानं प्रतीयते अतस्तदङ्गनिर्वापादीनामपि तथैव पौर्वापर्य्यं युक्तमिति भावः। नन्वत्र येन क्रमेण याज्यानुवाक्ययोः प्रवृत्तिस्तेनैव निर्वापादीनामपीति प्रावर्त्तिकनियमसम्भवे किमिति मुख्यक्रमादपि नियमः सम्भवतीति चेदुच्यते दर्शपौर्णमासयोः सान्नाय्यस्य दधिदुग्धरूपहविषोधर्म्माः शाखाप्रहरणादयः पूर्वं प्रवर्त्तन्ते तत्राग्नेयस्य धर्म्मा निर्वापादयः याज्यानुवाक्ययोस्तु पाठक्रमात् प्रथममाग्नेयहोमः पश्चात् सान्नाय्यस्येति विपरीता प्रवृत्तिः तत्र किं मुख्यक्रमात् प्रथममाग्नेयस्याभिघारणादित्रयाणां मध्ये आग्नेयस्य प्रथमं प्रवृत्तिः? किं वा भूतभाविप्रवृत्तिद्वयवशादनियम इति प्राप्ते मुख्यक्रमाभिधानम्। तस्मात्तत्र मुख्यक्रमादाग्नेयस्य प्रथममभिघारणम् एवञ्च सति अङ्गप्रधानयोर्यावदनुज्ञातमेव व्यवधानं स्यादितरथा तु पश्चाद्भाविप्रधानस्य प्रथमं क्रियमाणमङ्गं प्रधानेनात्यन्तव्यवहितं स्यान्मुख्यक्रमेण नियमे। इयांस्तु विशेषः मुख्यक्रमे प्रधानप्रवृत्तिरङ्गानां नियमकारणं, प्रवृत्तिक्रमे त्वङ्गानां मिथः प्रत्यासत्तिरिति।

६ प्रवृत्तेर्यथा वाजपेये “सप्तदश प्राजापत्यान् पशूनालभेतेति” श्रूयते तेषाञ्चोपाकरणनियोजनादयः संस्कारा विहिता उपाकरणं प्रोक्षणं नियोजनं यूपेबन्धनं तत्र चेदृशे पशावुपक्रमः ईदृशे च समाप्तिरिति नियमकारिणः शास्त्रस्याभावात् ऐच्छिकेन क्रमेणोपाकरणसंस्कारः उत उपकृतानाञ्च यूपे नियोजनसंस्कारः पश्चात् कर्त्तव्यः? इति तत्रापि नियमकारिणां श्रुत्यर्थपठनादीनामभावान्नास्ति क्रमनियमः ऐच्छिक एव क्रम इति प्राप्ते आह “प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्” सू० तुल्यकालानामेककालप्रवृत्तानां गुणानामङ्गानामुपाकरणादीनां प्रवृत्त्या उपाकरणप्रथमसंस्कारे स्वेच्छातः प्रवृत्तेः तत्क्रमेण तदुपक्रमात् प्रथमोपाकृतपशुक्रमात् प्रवृत्तिक्रमो ग्राह्यः। अत्र ब्रूमः स्वेच्छातो यस्य पशोः प्रथममुपाकरणं क्रियते तस्यैव प्रथमनियोजनादि कार्य्यं, तदनन्तरं तदुत्तरोपाकृतस्य नियोजनमेवेत्यपरापरस्यापीत्यर्थः। प्रथमगुणारम्भत्यागे कारणाभावात्। अयमभिप्रायः प्रावर्त्तिकक्रमस्वीकारे प्रथमपश्चादुपाकरणनियोजनयोः प्रथमद्वितीयसंस्कारयोर्मध्ये पश्वन्तरेष्वनुष्ठितैरुपाकरणैः षोडशभिरेव व्यवधानं भवति तच्चाभ्यनुज्ञातं सप्तदशे विधानात् प्रावर्त्तिकं क्रमं परित्यज्य पश्वन्तराणां पूर्व्वं नियोजनं कृत्वा पश्चात् प्रथमपशोर्नियोजनं यदि क्रियते तदा द्वात्रिंशद्भिः पदार्थैर्व्यवधानं स्यात् तच्च नाभ्यनुज्ञातम् तदुक्तम्, “प्रवृत्त्या वा नियम्येत प्रत्यासत्तेरनुग्रहात्। अन्यथा व्यवधानं स्यादनुज्ञाताधिकैरपीति”।

कात्यायनश्रौतसूत्र १।५।१ सूत्रादौ तद्भाष्ये च क्रमविशेषास्तेषां बलाबलञ्चोक्तं यथा

“कर्म्मणामानुपूर्व्यं न युगपद्भावात्” १सू०। आनुपूर्व्यं पौर्वापर्य्यं क्रम इत्यनर्थान्तरम् कर्म्मणामिति अग्न्यन्वाधानादीनामङ्गकर्म्मणामनुष्ठाने आनुपूर्व्यं न भवति क्रमनियमो न भवति। कुतः? युगपद्भावात् अतस्तान्यङ्गानि